**दिनाङ्कः - 29.10.2024**

**सायम्  - 06:20**

**<u>मुख्यवार्ताः</u>**

- **प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य प्रायशः त्रयोदश-सहस्र-कोटिरूप्यकाणां स्वास्थ्यक्षेत्रसम्बद्धानां बहुविधप्रकल्पानां परियोजनानाम् उद्घाटनम्, शिलान्यासः च कृतः।**
- **देशस्य चत्वारिंशत्स्थलेषु अद्य वृत्तिमेलकम् आयोजितम्। प्रधानमन्त्री नवनियुक्तेभ्यः युवभ्यः एकपंचाशत्सहस्रं यावत् नियुक्तिपत्राणि प्रदत्तवान्।**
- **जम्मूकश्मीरराज्ये अखनूर-मण्डले आतङ्कवादिभिः जाते एकस्मिन् सङ्घर्षे सुरक्षा-बलैः त्रयः आतङ्कवादिनः व्यापादिताः।**
- **महाराष्ट्र राज्ये एकलचरणीयमतदानाय अपि च झारखण्ड-राज्ये द्वितीयचरणाय विधानसभा-निर्वाचनाय अद्य नामाङ्कन-पूरणप्रक्रिया अद्य सम्पन्ना।**
- **केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य नव-दिल्ल्यां मेजर-ध्यानचन्द क्रीडाङ्गणे रन-फॉर यूनिटी इत्येतां धावनक्रीडां हरित-ध्वजं प्रदर्शितवान्।**

**<u>प्रधानमन्त्री-धनवन्तरी-जयन्ती</u>**

**प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य धनवन्तरीजयन्त्याः नवमस्य आयुर्वेददिवसस्य च अवसरे नवदिल्ल्यां प्रायशः पञ्चाशदधिक-अष्टशतोत्तर-द्वादशसहस्र-कोटिरूप्यकाणां स्वास्थ्यक्षेत्रसम्बद्धानां बहुविधप्रकल्पानाम् उद्घाटनम्, शिलान्यासः च कृतः। प्रधानमन्त्री आयुष्मान्-भारत-प्रधानमन्त्री-जन-आरोग्य-योजनायाः प्रमुख-योजनायाः रूपेण सप्तति वर्षतः अधिकवयस्कानां सर्वेषां वरिष्ठनागरिकाणां कृते स्वास्थ्य-व्याप्ति-विस्तारम् अपि प्रारब्धवान्। एतेन सर्वेषां वरिष्ठनागरिकाणाम् आयस्य विचारं विना**

स्वास्थ्य-रक्षणं प्रदातुं साहाय्यं भविष्यति। भारतस्य प्रथमस्य अखिलभारतीय-आयुर्वेद-संस्थानस्य द्वितीय-चरणस्य उद्घाटनम् अपि श्रीमोदी अकरोत्। अत्रावसरे प्रधानमन्त्री समुदीरितवान् यत् यदा देशस्य नागरिकः स्वस्थाः भविष्यन्ति तदा देशस्य प्रगतिः द्रुतगत्या भवति। प्रशासनेन एतदर्थं स्वास्थ्यनीतेः पञ्चस्तम्भाः स्थापिताः। एते स्तम्भाः सन्ति निवारक-स्वास्थ्यसेवाः, ससमयं निदानम्, अल्पमूल्येषु औषधयः उपचाराः च ग्रामेषु नगरेषु च उचित-स्वास्थ्यसेवाक्षेत्रे प्रौद्योगिकीनां विस्तारः इति। प्रधानमन्त्री निगदितवान् यत् देशाय प्रसन्नतायाः विषयो वर्तते यत् अयम् आयुर्वेददिवसः पञ्चाशदधिकैकशतं देशेषु समाचर्यते।

**प्रधानमन्त्री-नियुक्तिपत्राणि**

प्रधानमन्त्री श्रीमोदी प्रोक्तवान् यत् प्रशासनेन आत्मनिर्भर-भारतस्य दिशि अनेकानि महत्वपूर्ण कार्याणि विहितानि। अन्तरिक्षं समेत्य विद्युत्वाहनं यावत् सर्वेषु प्रौद्योगिक-सम्बद्धेषु क्षेत्रेषु मेक इन इण्डिया इति उपक्रमः अपि वर्धितः। श्रीमोदिना अग्रे प्रोक्तं यत् भारतं विश्वस्य तृतीया वर्धमाना अर्थव्यवस्था भविष्यति। प्रधानमन्त्री अद्य विभिन्नेषु प्राशासनिक-विभागेषु सङ्घटनेषु च एकपञ्चाशत्सहस्राधिकं नव-नियुक्तेभ्यः युवभ्यः नियुक्तिपत्राणि समर्पितवान्। अन्तर्जालीयमाध्यमेन आयोजितं समारोहं सम्बोधयन् असौ प्रावोचत् यत् प्रशासनं युवभ्यः अधिकाधिकं वृत्यवसरान् प्रदातुं प्रतिबद्धं वर्तते।

श्रीमोदी पुनः अकथयत् यत् प्रशासनं प्रधानमन्त्रि-इण्टर्नशिप-योजनायाः अन्तर्गतं देशस्य शीर्षेषु पञ्चशतं समवायेषु युवभ्यः पेड-इण्टर्नशिप इति राशिप्रदातृ-वृत्यवसरस्य प्रबन्धनानि कृतवान् इति।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**झारखण्ड-विधानसभा**

**महाराष्ट्रराज्ये एकलचरणीय-मतदानाय अपि च झारखण्ड-राज्ये द्वितीयचरणाय विधानसभा-निर्वाचनाय अद्य नामाङ्कन-पूरणप्रक्रिया अद्य सम्पन्ना। एतयो: द्वयो: राज्ययो: नामांकनपत्राणां निरीक्षणकार्यं श्वो भविष्यति। प्रत्यशिन: नवम्बर-मासस्य प्रथम-दिनांक-पर्यन्तं स्वीय-नामाङ्कन-प्रत्यावर्तनं कर्तुं शक्यते। महाराष्ट्रस्य अष्टाशीत्यधिक द्विशतं विधानसभाक्षेत्रेभ्य: तथा च झारखण्डस्य द्वितीयचरणस्य अष्टात्रिंशत्-विधानसभासनेभ्य: मतदानम् अग्रिममासस्य विंशति-दिनाङ्के भविष्यति। झारखण्ड-महाराष्ट्र-राज्ययो: विधानसभा-निर्वाचनस्य मतगणना नवम्बर-मासस्य त्रयोविंशति दिनाङ्के भविष्यति।**

**जयशङ्कर:-सैन्यसम्मेलनम्**

**विदेशमन्त्री डॉ एस् जयशंकर: अद्य नवदिल्ल्यां सैन्याध्यक्षाणां सम्मेलनम् सम्बोधितवान्। समारोहावधौ डॉ जयशङ्कर: वर्तमान-भू-राजनीते: समस्या: सम्भावना: उपलब्धी: च समाश्रित्य स्वीयं वक्तव्यं प्रदत्तवान्। अत्रावसरे विदेशमन्त्री राष्ट्रियसुरक्षाम् प्रभाविरीत्या स्थापयितुं प्रशासनस्य समग्र-दृष्टया: आवश्यकता वर्तते इति उक्तवान्।**

**<u>रनफॉरयूनिटी</u>**

**केन्द्रीय-गृहमन्त्री अमित-शाह: अद्य नव-दिल्ल्यां मेजर-ध्यानचन्द क्रीडाङ्गणे रन-फॉर यूनिटी इत्येतां धावनक्रीडां हरित-ध्वजं प्रदर्शिवान्। एष: कार्यक्रम: सरदार-वल्लभभाई-पटेल-वर्यस्य जयन्त्यवसरे आयोजित:। यस्य जन्म अक्टूबर-मासस्य एकत्रिंशद्दिनाङ्के पञ्चसप्तत्यधिक-अष्टादश-शततमे वर्षे अभवत्। अस्मिन् अवसरे गृह-मन्त्रिणा प्रोक्तं यत् अद्य भारतं सर्वस्मिन् क्षेत्रे अग्रगामिनं भवितुं विश्वस्य समक्षे पदस्थरूपेण स्थितमस्ति तथा च अस्य कृते आधारशिला सरदार-पटेलवर्येण स्थापिता आसीत्। सरदार-वल्लभ-भाई-पटेलस्य योगदानानां स्मरणं कृत्वा गृहमन्त्रिणा प्रोक्तं यत् तेन पटेलवर्येण संयुक्त-भारतस्य स्थापनाय विभिन्न-राजतन्त्रान् एक-सूत्रेण संघटितं कर्तुं महत्वपूर्णं योगदानं प्रदत्तवान्।**

**<u>जम्मू-कश्मीर-आतङ्कीमृत्यु:</u>**

**जम्मूकश्मीरराज्ये जम्मूसम्भागस्य अखनूर-मण्डले आतङ्कवादिभि: जाते एकस्मिन् सङ्घर्षे सुरक्षा बलै: त्रय: आतङ्कवादिन: व्यापादिता:। आतङ्कवादिन: सेनासमूहस्य रुग्णवाहनस्योपरि आक्रमणं कृतवन्त:। सुरक्षाबलै: सञ्चालिते एकस्मिन् संयुक्ताभियाने त्रय: आतङ्कवादिन: मारिता: सङ्घर्षोऽयं सम्पन्न: तत्रैव आतङ्कीनां शवान्वेषणकार्यं सम्प्रति विधीयते।**

**<u>प्रधानमन्त्री-धन्वन्तरिजयन्ती</u>**

**प्रधानमन्त्री अद्य धनत्रयोदश्या: श्रीधन्वन्तरिजयन्त्या: च शुभावसरे सकलेभ्य: जनेभ्य: शुभकामना: अयच्छत्। एकस्मिन् सामाजिकसन्देशपटले श्रीमोदी अलिखत् यत् भगवत: धन्वन्तर्या: आशीर्वादेन समेषां जीवनं सर्वदैव स्वास्थ्य-प्रसन्नता-समृद्धिभि: ओतप्रोतं स्यादिति।**

**अयोध्या-दीपोत्सव:**

**भगवत: श्रीरामस्य नगर्याम् अयोध्यायां दीपोत्सव: महदुत्साहेन आचरिष्यते। आशास्यते यत् अयं दीपोत्सव: भव्यं भविष्यति यतोहि उत्तरप्रदेश-प्रशासनेन सरयूनद्या: तटे अष्टाविंशतिदीपान् प्रज्वाल्य नवीनं कीर्तिमानं निमास्यते। सम्पूर्णा नगरी दीपोत्सवाय उत्सुका उत्साहिता चास्ति। अपि च अस्मै आयोजनाय अयोध्यानगरी सर्वविधप्रकारेण सज्जास्ति।**

**।।इति वार्ता:।।**